# प्रथमोऽध्यायः

## संस्कृतवाङ्गमये ज्योतिषशास्त्रस्य वैशिष्ट्यम्

## अध्यायः– १. संस्कृतवाङ्गमये ज्योतिषशास्त्रस्य वैशिष्टयम्

### १.१ ज्यौतिषशास्त्रस्य परिभाषा

अस्य शास्त्रस्य परिभाषा समये समये विभिन्नरूपेषु स्वीकृता वर्तते । सुदूरप्राचीनकाले केवलं ज्योतिष्पदार्थानां[4] ग्रह-नक्षत्र-तारकादीनां स्वरूपविज्ञानमेव ज्यौतिषं कथ्यते स्म । तस्मिन् समये सैद्धान्तिकगणितस्य बोधोऽनेन शास्त्रेण न भवति स्म । यतो हि तस्मिन् काले केवलं दृष्टिपर्यवेक्षणेन नक्षत्राणां ज्ञानप्राप्तिरेवाभिप्रेताऽऽसीत् ।

भारतीयानां यदा सूर्यचन्द्रयोरुपरि दृष्टिरपतत्, तैराभ्यां भयाक्रान्तैर्भूत्वैतौ देवत्वरूपे स्वीकृतौ । वेदेषु बहुत्र नक्षत्र-सूर्य-चन्द्राणां स्तुतिपरका मन्त्रा आगताः सन्ति । निस्संदेहं प्रागैतिहासिकेन भारतीयमानवैः तेषां रहस्येन प्रभावितेन भूत्वैवैते देवत्वरूपेणाङ्गीकृताः ।

ब्राह्मणानामारण्यकानां च समये इयं परिभाषाऽधिका विकसिताऽभूत् तथा तस्मिन् काले नक्षत्राणामाकृति-स्वरूप-गुण-प्रभावादीनां परिज्ञानं ज्यौतिषं स्वीकृतमभवत् । तत्पश्चान्नक्षत्राणां शुभाशुभफलानुसारं कार्याणां विवेचनं तथा ऋत्वयनदिनमानलग्नादीनां शुभाशुभानुसारं विधायककार्यसम्पादनास्य ज्ञानप्राप्तिरपि अस्य शास्त्रस्य परिभाषायां परिगणिताऽभूत् । सूर्यप्रज्ञप्ति-ज्योतिषकरण्डक-वेदाङ्गज्योतिषप्रभृतिग्रन्थानां प्रणयनं यावज्ज्यौतिषस्य सिद्धान्त-फलितनामकं भेदद्वयं स्पष्टीभूतं नासीत् । परिभाषेयमत्रैव सीमिता नाभूत् । ज्ञानोन्नत्या सार्धं विकासमधिगच्छन्त्या अस्या अन्तर्गतं स्वरूप-वर्ण-दिशा-तत्त्व-धात्वादिकं विवेचनमप्यागच्छत् ।

---

[4] भारतीयज्योतिष, शङ्करबालकृष्णदीक्षित, पृ.-७

उदयकालान्ते ज्यौतिषस्य सिद्धान्तफलितात्मकं भेदद्वयं स्वतन्त्ररूपेण प्रस्फुटितमभवत् । ग्रहाणां गतिस्थित्ययनांशपातादिविषयाः सिद्धान्तज्यौतिषान्तर्गता जाताः तथा शुभाशुभसमयनिर्णयविधायकयज्ञयागादिकार्यसम्पादनाय समयस्य स्थानस्य च निर्धारणं फलितज्यौतिषविषयत्वेन स्वीकृतम् । अस्मिन्नेव काले संहिताशास्त्रमपि प्रादुरभूत्

## १.२ ज्योतिषशास्त्रस्यैतिह्यम्

समस्तभारतीयदर्शनशास्त्रस्य एवं विज्ञानस्यैकमात्रं लक्ष्यं स्वकीयात्मनः विकासं कृत्वा परमात्मनिलीनकरणमेवास्ति । विज्ञानदर्शनादीनां शास्त्राणामिव ज्योतिषशास्त्रमपि विज्ञानत्वात् अस्याखिलब्रह्माण्डस्य रहस्यान् व्यक्तकरणस्य सफलप्रयत्नः करोति । अतः उक्तमपि-

**अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।**

**प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्राकौं यत्र साक्षणौ ।।**[5]

भारतवर्षे समुपलब्धेषु ग्रन्थेषु प्राचीनतमवेदग्रन्थाः एव सन्ति, अयं सर्वविदितः अस्ति । वेदाः अपौरुषेयाः इति । परञ्च प्राणीनां हितसाधनार्थं सर्वशक्तिमान् परमात्मा त्रिकालज्ञमहर्षिभिः सृष्ट्यारम्भकालैव तेषां प्रकाशनार्थं प्रेरितः । प्राणिनामाधिभौतिकाधिदैविकाध्यात्मिकत्रिविधदुःखानां निवृत्तेः तथा धर्मार्थकाममोक्षस्वरूपपुरुषार्थचतुष्टयस्य प्राप्तेः सर्वोत्तमः पथप्रदर्शकः वेदोऽस्ति । मनुनाप्युक्तम् —

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।**

---

[5] बृहद्दैवज्ञरञ्जनम्, प्र.-१, श्लो.-२६

**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ।।**[6]

**यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः ।**

**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।।**[7]

अर्थात् सम्पूर्णवेदः, वेदज्ञातामन्वादीनां स्मृतिः तेषां त्रयोदशप्रकारस्य शीलः, धार्मिकानामाचारः तथा स्वकीयमनसः प्रसन्नतैतानि धर्ममूलानि सन्ति । वेदपुरुषस्य षडङ्गेषु (व्याकरणज्योतिषनिरुक्तकल्पशिक्षाछन्दश्चैतेषु) ज्योतिषं नेत्राङ्गं मन्यते । नारदेनाप्युक्तम् —

**वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमकल्मषम् ।**

**विनैतदखिलं कर्म श्रुतं स्मार्तं न सिद्ध्यति ।।**[8]

नेत्राङ्गत्वात् ज्योतिषस्य स्थानं सर्वोपरि मन्यते । लगधस्य कथनं वर्तते यत्-

**यथा शिखा मयूराणां नागानां मणयो यथा ।**

**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्निसंस्थितम् ।।**[9]

भास्कराचार्येणोक्तम् —

---

[6] मनुस्मृतिः २/६

[7] मनुस्मृतिः २/७

[8]नारदसंहिता पृ. ८

[9]वैदिकज्योतिष, याजुष ज्योतिष, पृ. ५

**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।**

**संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित् करः ।।**[10]

शिक्षा-कल्प-व्याकरण-निरुक्त-ज्योतिषच्छन्दादिषु षट्सु वेदाङ्गेषु ज्योतिषं चक्षुरित्याचक्षते। यथा चक्षुर्विना प्रतिपदं पथिको निपतति तथैव ज्योतिषं विना होमादि-विधौ प्रवृत्तः निपतेत् । अतेवोच्यते 'ज्योतिषं वेदचक्षुः' इति । षट्ष्वङ्गेष्वस्य च प्राधान्यमङ्गत्वेन स्वीकारः कृतः विविधाचार्यैः । यथेतरे कर्णनासिकादिभिरन्वितोऽपि नयनविहीनो जनः किमपि कर्तुं न प्रभवति तथैव ज्योतिषं विना जनः किमपि कर्तुं न प्रभवतीति स्पष्टम् ।

यद्यप्ययं सामान्यसिद्धान्तोऽस्ति यत् सर्वे स्वीयवर्गस्य, स्वीयविषयस्य पक्षपातिनः भवन्ति । परञ्च दिग्देशकालव्यञ्जकत्वेन यज्ञतपदानव्रतोपवासपर्वादिसकलकर्मणां आदिबीजत्वात् अन्यशास्त्रापेक्षया ज्यौतिषशास्त्रस्याध्ययनमत्यावश्यकं वर्तते कारणं यत् सर्वाणि कार्याणि अन्यमाध्यमेन भवितुं शक्यते किन्तु निश्चितसमये क्रियमाण: कर्म एव सफलं भवति । अकाले अर्थात् अनुचितसमये क्रियमाणकर्मनिष्फलं एवं दुर्गतिदायकं भवति । अत एव कालात्मकज्यौतिषशास्त्रस्य पदे-पदे (पथि-पथि) प्रयोजनं स्पष्टतया सिद्धमस्ति। अस्य ज्ञानं विना वैदिकं लौकिकञ्च किमपि कार्यं सिद्धं न भवितुमर्हति । सर्वे वेदाः यज्ञकर्मात्मकाः वर्तन्ते, संस्काराणां यज्ञानां च सर्वासां क्रियाणां निर्श्चितमुहूर्तेषु निश्चितकालावधौ सम्पादनं करणमत्यावश्यकम् । एतदर्थं ज्योतिषशास्त्रीयपञ्चाङ्गमेव एकमात्र आधारः वर्तते । कस्यापि धार्मिकानुष्ठानस्य सम्पादने तिथिः, वारः, नक्षत्रं, योगः तथा करणमिति पञ्चाङ्गानां ज्ञानमत्यावश्यकम् अतः

---

[10]सि.शि., मध्यमाधिकारः. श्लो.-५ (होरारत्नम्, भागः-१, भूमिकायां, पृ. १, डॉ. मुरलीधरचतुर्वेदी)

प्रत्येकवेदात् सम्बद्धज्योतिषस्याध्ययनं वैदिककालादेव प्रचलितं वर्तते । केवलं ऋग्वेदादिप्राचीनग्रन्थेषु स्फुटवाक्यांशैः एव ज्ञानं भवति यत् तस्मिन् समये ज्योतिषस्य ज्ञानं कियदासीत् । वेदेषु ज्योतिषस्य स्वरूपम् एतादृशमस्ति- चतुर्षु वेदेषु प्रायेण ऋग्वेदे, अथर्ववेदे च ज्योतिषसम्बन्धी वर्णनम् उपलभ्यते । ऋग्वेदस्य[11] दशममण्डले-सप्तममण्डले च तथैव अथर्वसंहितायां नक्षत्राणां वर्णनं प्राप्यते । तैत्तिरीयसंहितायां नक्षत्रविषये यद् विवेचनम् उपलभ्यते तत्र नक्षत्रदेवतादीनां, लिङ्गवचनादिकं च उपलभ्यते । वेदान्तरं पुराणेषु ज्योतिशस्य स्वरूपम् अधिकं विस्तृतरूपेण दृश्यते । प्रायेण- अग्निपुराणे, श्रीमद्भागवते, स्कन्धपुराणे, वायुपुराणे च ज्योतिशस्य त्रिविधं रूपं विद्यते । तत्र संहिता ज्योतिशस्य, फलितज्योतिषस्य च विस्तारः प्रदत्तो वर्तते ।

उपर्युक्तपञ्चाङ्गानां वर्णनं वेदेषु बहुत्र लभ्यते । साराम्शतः वक्तुं शक्यते यत् ज्योतिषस्य साम्प्रतिकं स्वरूपं यद् वर्तते तत् स्वरूपं वेद-पुराणानां प्रभावेणैव वर्तते।

## १.३ ज्योतिषशास्त्रस्योत्पत्ति:

ज्योतिषशास्त्रस्यारम्भः कुतो जातः ? विषयेऽस्मिन् आचार्यलोकमणिदाहालेन ज्योतिषशास्त्रस्येतिहासे कथितं यत् ब्रह्मकालावबोधकं शास्त्रं ज्योतिषनामकं निर्माय नारदाय प्रावोचत् । “कालसौष्ठव ज्ञानम्” । यद्यपि प्रप्रथमं ऋग्वेदज्योतिषं द्वितीयं च यजुर्वेदज्योतिषमिति स्पष्टम् ऋक्ज्योतिषे हि षट्-त्रिंशत्श्लोकाः सन्ति तथा यजुर्वेदज्योतिषे एकोनपञ्चाशत्संख्याकाः श्लोकाः सन्ति । एतेषु ज्योतिषसम्बन्धिघटनानां तथ्यानां च वर्णनं समुपलभ्यते । वैदिककालानन्तरं

11 ऋग्वेदसंहिता १०/३/१२

पौराणिककाले विविधपुराणेषु ज्योतिषस्य सम्यक्तया विवेचनं प्राप्यते । नारदश्चास्य शास्त्रस्य महत्त्वमङ्गीकृत्येदं शास्त्रं लोके प्रवर्तयामास ।[12]इत्थमनुमीयते यत् तदा प्रभृत्येव ज्योतिषस्य सम्यक्तया प्रचार अभवत् । नारदसंहितानुसारेण ब्रह्मणा प्रवर्तितं शास्त्रं ज्योतिषं, ब्रह्मा नारदाय, नारदः सोमाय, सोमः शौनकाय, नारायणो वसिष्ठाय रोमशाय च, वसिष्ठो माण्डव्यवामदेवाभ्यां, व्यासः स्वशिष्याय, सूर्यो मयाय, पुलस्त्याचार्यगर्गत्रिरोमकाः स्वस्वशिष्येभ्यः पराशरो मैत्रेयाय च प्रोक्तवन्त इति । अधीयमानाः वसिष्ठादयो महर्षयोऽतीन्द्रियज्ञानवन्तः क्रान्तिदर्शितसत्त्ववेत्तारः सर्वज्ञाश्च आसन् । अतीन्द्रिययोगिनां प्रत्यक्षज्ञानविषये भर्तृहरिणा कथितमस्ति यत् यैः स्वान्तःकरणे प्रकाशस्य दर्शनं विहितं तथा येषां चित्तं कथमपि व्याघातेनाशान्तो न भवति । तेभ्यो भूत-वर्तमान-भविष्यकालिकं ज्ञानं सद्यो भवति । यथा —

**अनुभूत प्रकाशानामनुप्लुतचेतसाम् ।**

**अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ।।**[13]

काश्यपसंहितायामाचार्यकाश्यपेन ज्योतिषशास्त्रस्याष्टादशप्रवर्तकाः प्रतिपादिताः । ते च यथा —

**सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः ।**

**कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिरा ।।**

**रो(लो)मशः पौलिशश्चैव च्यवनो यवनो भृगुः ।**

---

[12] ज्यो.शा.इति. पृ. २३६

[13] वा. पदीयम्, ब्र.का., श्लो. ३७

**शोनकोऽष्टादशश्चैते ज्योतिःशास्त्र प्रवर्तकाः ।।14**

नारदस्तवथ तानित्थमाह्-

**ब्रह्माचार्यो वसिष्ठोऽत्रिर्मनुः पौलस्त्यरोमशौ**

**मरीचिरङ्गिरा व्यासो नारदः शौनको भृगुः ।**

**च्यवनो यवनो गर्गः काश्यपश्च पराशरः**

**अष्टादशैते गम्भीरा: ज्योतिश्शास्त्रप्रवर्तकाः ।।15।।**

जगतः पितामहः ब्रह्मा हि यज्ञसाधननिमित्तं चतुर्भ्यः मुखेभ्यश्चतुर्णां वेदानां निर्माणं कृतवान्, ते च यज्ञाः कालाश्रयेणैव सिद्धयन्ति इति । तत्सिद्ध्यर्थं कालबोधकज्योतिषशास्त्रनिर्माणं जातम्। नारदश्च अस्य शास्त्रस्य महत्त्वं अङ्कीकृत्य प्रथमं द्वौ स्कन्धौ रचितौ संहितास्कन्धं होरास्कन्धं च, शुभाशुभज्ञानार्थं संहिता तथा च होराशास्त्रस्य कथनं लोकव्यवहाराणां सिद्ध्यर्थं कथितं वर्तते । एवं प्रकारेण ब्रह्माद्वारा प्रवर्तितं शास्त्रं बह्मा नारदाय तथा च नारदः लोके प्रवर्तयामास इति । मतमतान्तरानुसारेण शास्त्रं प्रथमं सूर्यमुखेन उक्तम्, ततश्च जगति प्रवर्तितम् इति ।बृहत्संहितायामुक्तम्-

**मुनिविरचितमिदमिति यच्चिरन्तनं साधु न मनुजग्रथितम् ।**

**तुल्येऽर्थेऽक्षरभेदादमन्त्रके का विशेषोक्तिः ।।16।।**

---

14 ना.सं. भूमिका, पृ. १०

15 भारतीयज्योतिषशास्त्रस्येतिहासः, पृ. ९

16 बृहत् संहिता, अ. १, श्लो.-३

इत्थं ज्योतिषशास्त्रं वेदशाखा एव विद्यते ।कश्यपसंहितानुसारेण ज्योतिषशास्त्रस्य प्रवर्तका अष्टादशमुख्याचार्याः सन्ति ।इति प्रमाणबलेन ज्योतिश्शास्त्रस्याद्यप्रवक्ता सूर्य इति ज्योतिर्विद्भिः स्वीक्रियते । पराशरस्तु एवमेव मुख्याचार्यः सन्ति । यथा –

**विश्वसृङ् नारदो व्यासो वशिष्ठोऽत्रिः पराशरः ।**

**लोमशो यवनः सूर्यश्च्यवनः कश्यपोभृगुः ।।**

**पुलस्त्यो मनुराचार्यः पौलिशः शौनकोऽङ्गिराः ।**

**गर्गो मरीचिरित्येते ज्ञेया ज्योतिः प्रवर्तकाः ।।17।।**

नारदस्त्वथ तानित्थमाह –

**ब्रह्माचार्यो वशिष्ठोऽत्रिर्मनुः पौलस्त्यरोमशौ ।**

**मरीचिरङ्गिरा व्यासो नारदः शौनको भृगुः ।।**

**च्यवनो यवनो गर्गः कश्यपश्च पराशरः ।**

**अष्टादशैते गम्भीरा ज्योतिः शास्त्रप्रवर्तकाः ।।**[18]

यतः –

**अध्ययनसङ्क्रान्ति ग्रह-षोडशकर्मणां प्रयोजनस्य**

**सिद्ध्यर्थंतत्कालविनिर्णयात् ।**

---

17 पाराशरसंहिता, अ. १

18 नारदसंहिता

**एतेषां विहीनः श्रोतं-स्मार्तं कर्मं न सिद्ध्यति ।**

**ते दृष्ट्वा जगद्धितायेदं ब्रह्मणा रचितं पुरा ।।**

**तं विलोक्याथ तत्सूनुर्नारदो मुनिसत्तमः ।**

**उक्त्वा स्कन्धद्वयं पूर्वं संहितास्कन्धमुत्तमम् ।।**

**जातकानां शुभाशुभफलं ज्ञातुं शक्यते तदनुसारं ।**

**होरास्कन्धशास्त्रव्यवहारे प्रसिद्धं ज्ञायते ।।**

ब्रह्मणा उक्तं शास्त्रं हि ज्योतिः शास्त्रम् । ब्रह्मः नारदाय, सोमः शौनकाय, नारायणो वशिष्ठाय, रामेशाय च वशिष्ठो, माण्डव्यवामदेवाभ्यां व्यासः, स्वशिष्याय सूर्योमयाय, पुलस्त्यः आचार्यः गर्गाय, अत्रिः रोमकाय, स्वस्वशिष्येभ्यः, पराशरो मैत्रेयाय चोक्तवन्तः इति ।अस्य शास्त्रस्य प्रथमं ब्रह्मणायज्ञप्रवर्तनाय रचनाकृता । तत्पश्चात् शिष्यपरम्परामाध्यमेन एतस्य शास्त्रस्य विस्तारः अभवत् । तदेव आर्यभटेन प्रकाशितं, वराहमिहिरेण च विवेचनं कृतम् । अथ च वराहमिहरः उक्तवान् –

**प्रथममुनि कथितमवितथवलोक्य ग्रन्थविस्तरस्यर्थम् ।**

**नातिलघुविपलरचनाभिरूधतः स्पष्टमभिधातुम् ।।**

**विस्तारकृतानि मुनिभिः परिहृत्य पुरातनानि शास्त्राणि ।**

**होरातन्त्रं रचितं वराहमिहिरेण संक्षेपात् ।।**[19]

[19] सारावली, अ.१, श्लो. २

अतः ज्योतिषशास्त्रस्यउत्पत्तिः विविधमतेन ज्ञायते । वस्तुतः प्राचीनकालादेव शास्त्रस्यास्य महत्त्वपूर्णं स्थानं वेदादिग्रन्थेषु निगदितमेव, तेन प्रभावेणैव अद्यतनीयाधुनिककाले ज्योतिषं स्वोपयोगितायाः परिचयं कारयन् विविधक्षेत्रेषु लोकोपकारकत्वेन निरन्तरं जनान् स्व-स्वकर्मसु प्रेरयति । कर्मणः महत्ता-विषयकचर्चा तु भगवद्गीतायां भगवताश्रीकृष्णेन कृतैव । यथा-

**कर्मण्येधिकारस्ते मा फलेषु कदाचन ।**

**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।20।।**

तस्यैवोद्घोषस्य सार्थकतां सिद्धं कुर्वन् ज्योतिषं वर्तमानकालिकजनेभ्योऽपि तेषां कृताकृतशुभाशुभकर्मणां फलं निर्दिशति इति कथानाभिप्रायः ।

[20] श्रीमद्भगवद्गीता २/४७